# Nagakumarikabhih Kritam Shiva Stotram

# નાગકુમારિકાભિઃ કૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Nagakumarikabhih Kritam Shiva Stotram

File name : nAgakumArikAbhiHkRRitaMshivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 76/104-115||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# નાગકુમારિકાભિઃ કૃતં શિવસ્તોત્રમ્

વવન્દુરથ તા બાલા જ્ઞાત્વા લક્ષ્મભિરીશ્વરમ્ ।
તુષ્ટુવુશ્ચ પ્રહૃષ્ટાસ્યાઃ સન્નકણ્ઠ્યોઽતિગદ્ગદમ્ ॥ ૧૦૪॥

જય શમ્ભો જયેશાન જય સર્વગ સર્વદ ।
જય ત્રિપુરસંહર્તર્જયાન્ધકનિષૂદન ॥ ૧૦૫॥

જય જાલન્ધરહર જય કન્દર્પદર્પહૃત્ ।
જય ત્રૈલોક્યજનક જય ત્રૈલોક્યવર્ધન ॥ ૧૦૬॥

જય ત્રૈલોક્યનિલય જય ત્રૈલોક્યવન્દિત ।
જય ભક્તજનાધીન જય પ્રમથનાયક ॥ ૧૦૭॥

જય ત્રિપથગાપાથઃપ્રક્ષાલિતજટાતટ ।
જય ચન્દ્રકલાજ્યોતિર્વિદ્યોતિતજગત્ત્રય ॥ ૧૦૮॥

જય સર્પફણારત્નપ્રભાભાસિતવિગ્રહ ।
જયાદ્રિરાજતનયાતપઃક્રીતાર્ધદેહક ॥ ૧૦૯॥

જય શ્મશાનનિલય જય વારાણસીપ્રિય ।
જયાનન્દવનાધ્યાસિ પ્રાણિનિર્વાણદાયક ॥ ૨.૭૬.૧૧૦॥

જય વિશ્વપતે શર્વ શર્વરીપરિવર્જિત ।
જય નૃત્યપ્રિયેશોગ્ર જય ગીતવિશારદ ॥ ૧૧૧॥

જય પ્રણવસદ્વાસ જય ધામ મહાનિધે ।
જય શૂલિન્વિરૂપાક્ષ જય પ્રણતસર્વદ ॥ ૧૧૨॥

વિધિઃ સર્વવિધિજ્ઞોઽપિ ન ત્વાં સ્તોતું વિચક્ષણઃ ।
વાચો વાચસ્પતેર્નાથ ત્વત્સ્તુતૌ પરિકુણ્ઠિતાઃ ॥ ૧૧૩॥

વિદન્તિ વેદાઃ સર્વજ્ઞ ન ત્વાં નાથ યથાર્થતઃ ।
મનતીહ મનો ન ત્વામનન્તં ચાદિવર્જિતમ્ ॥ ૧૧૪॥

નમસ્તુભ્યં નમસ્તુભ્યં નમસ્તુભ્યં નમો નમઃ ।
ત્રિલોચન નમસ્તુભ્યં ત્રિવિષ્ટપ નમોઽસ્તુ તે ॥ ૧૧૫॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે ષટ્સપ્તતિતમા- ધ્યાયાન્તર્ગતં
નાગકુમારિભિઃ કૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ । અધ્યાય ૭૬/૧૦૪-૧૧૫॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa . adhyAya 76/104-115..

Proofread by PSA Easwaran

---

*Nagakumarikabhih Kritam Shiva Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*